**CCE PF**
**CCE PR**

ಸಂಕೇತ ಸಂಖ್ಯೆ : **16-S** ವಿಷಯ : **ಪ್ರಥಮ ಭಾಷೆ — ಸಂಸ್ಕೃತ**

**Code No. : 16-S** **Subject : First Language — SANSKRIT**

**प्रथम भाषा — संस्कृतम्**

**( ಹೊಸ ಪಠ್ಯಕ್ರಮ / New Syllabus )**

**( ಖಾಸಗಿ ಅಭ್ಯರ್ಥಿ + ಪುನರಾವರ್ತಿತ ಖಾಸಗಿ ಅಭ್ಯರ್ಥಿ / Private Fresh + Private Repeater )**

***ಸಾಮಾನ್ಯ ಸೂಚನೆಗಳು :***

i) ಇದು ಪ್ರಶ್ನೆ–ಸಹಿತ–ಉತ್ತರಪುಸ್ತಕವಾಗಿದೆ.

ii) ಪ್ರತಿ ಪ್ರಶ್ನೆಗೂ ಉತ್ತರ ಬರೆಯಲು ಪ್ರಶ್ನೋತ್ತರ ಪತ್ರಿಕೆಯಲ್ಲಿಯೇ ಸ್ಥಳಾವಕಾಶ ಮಾಡಿಕೊಡಲಾಗಿದೆ. ಉತ್ತರಗಳನ್ನು ನಿರ್ದಿಷ್ಟಪಡಿಸಿದ ಜಾಗದಲ್ಲಿಯೇ ಬರೆಯಬೇಕು.

iii) ಈ ಪ್ರಶ್ನೋತ್ತರ ಪತ್ರಿಕೆಯು ***A, B, C ವಿಭಾಗ***ಗಳಿಂದ ಕೂಡಿದ್ದು ಒಟ್ಟು 63 ಪ್ರಶ್ನೆಗಳನ್ನೊಳಗೊಂಡಿದೆ.

***'A' ವಿಭಾಗ***ದಲ್ಲಿ ಗದ್ಯ, ಪದ್ಯ, ಪೂರಕ ಪಾಠಗಳಿಗೆ ಸಂಬಂಧಿಸಿದ 40 ಪ್ರಶ್ನೆಗಳಿವೆ.

***'B' ವಿಭಾಗ***ದಲ್ಲಿ ವ್ಯಾಕರಣಕ್ಕೆ ಸಂಬಂಧಿಸಿದ 19 ಪ್ರಶ್ನೆಗಳಿವೆ.

***'C' ವಿಭಾಗ***ದಲ್ಲಿ ರಚನಾ ವಿಭಾಗಕ್ಕೆ ಸಂಬಂಧಿಸಿದ 4 ಪ್ರಶ್ನೆಗಳಿವೆ.

iv) ವಿದ್ಯಾರ್ಥಿಗಳು ಸೀಸದ ಕಡ್ಡಿ (ಪೆನ್ಸಿಲ್) ಯಿಂದ ಉತ್ತರಗಳನ್ನು ಬರೆಯಬಾರದು. ಪೆನ್ಸಿಲ್‌ನಿಂದ ಉತ್ತರ ಬರೆದಲ್ಲಿ ಮೌಲ್ಯಮಾಪನಕ್ಕೆ ಪರಿಗಣಿಸಲಾಗುವುದಿಲ್ಲ.

v) ಪ್ರಶ್ನೆ ಪತ್ರಿಕೆಯನ್ನು ಓದಲು 15 ನಿಮಿಷಗಳ ಹೆಚ್ಚಿನ ಕಾಲಾವಕಾಶ ನೀಡಲಾಗಿದೆ.

vi) ನಿಮ್ಮ ಪ್ರಶ್ನೋತ್ತರ ಕಿರುಪುಸ್ತಕದ ಬಲಭಾಗದಲ್ಲಿರುವ ಗೆರೆಯ ಪಕ್ಕದ ಖಾಲಿ ಜಾಗದಲ್ಲಿ ಯಾವುದೇ ರೀತಿಯ ಬರಹಗಳನ್ನು ಬರೆಯಬಾರದು.

***परीक्षार्थिनां सामान्याः सूचना :***

i) इदं प्रश्नयुक्तम् उत्तरपुस्तकम् अस्ति ।

ii) प्रत्येकं प्रश्नस्य उत्तरं लेखितुं प्रश्नयुक्ते उत्तरपुस्तिके एव पर्याप्तः स्थलावकाशः प्रकल्पितः । निर्दिष्टस्थानेषु एव उत्तराणि लेखनीयानि ।

iii) अस्मिन् प्रश्नयुक्ते उत्तरपत्रे ***A, B, C*** इति विभागत्रयं भवति । आहत्य 63 प्रश्नाः भवन्ति ।

***'A'*** विभागे गद्य-पद्य-पूरकपाठसम्बन्धिनः 40 प्रश्नाः भवन्ति ।

***'B'*** विभागे व्याकरणसम्बन्धिनः 19 प्रश्नाः भवन्ति ।

***'C'*** विभागे रचनासम्बन्धिनः 4 प्रश्नाः भवन्ति ।

iv) परीक्षार्थिनः उत्तराणि अङ्कनी (पेन्सिल्) द्वारा न लिखेयुः । पेन्सिल् द्वारा लिखितानि उत्तराणि मौल्यमापनार्थं न परिगण्यन्ते ।

v) परीक्षार्थिभ्यः प्रश्नानां पठनार्थम् अर्थग्रहणार्थं च पञ्चदशनिमेषकालावकाशः अधिकाः प्रदत्ताः ।

vi) दक्षिण पार्श्वे आरक्षित स्थाने किमपि न लेखनीयम् ।

## भागः - A

**( गद्य-पद्य-पूरकपाठाः )**

**( 79 अङ्काः )**

I. एकवाक्येन उत्तरं लिखत – 16 × 1 = 16

1. राजारामः कस्य पुत्रः ?
2. नाट्ये कति भावाः प्रकीर्तिताः ?
3. चतुर्विध पुरुषार्थेषु अन्तिमः पुरुषार्थः कः ?
4. सरस्वती नद्याः तीरे कस्य आश्रमः आसीत् ?
5. पुरुषेण यत्नैः कः साध्यः ?
6. जपापुष्पोत्करोपमं विवस्वन्तं कः ददर्श ?
7. भाषया धर्मतः च भिन्नमार्गमाश्रिताः के ?
8. दुर्योधनः कस्य पुत्रः ?
9. पाण्डवेषु कः राजपदवीम् अलभत ?
10. सिन्धुलराजः कुत्र प्रजाः पालयति स्म ?
11. सत्यव्रतशास्त्रिमहोदयस्य भार्या का ?
12. कः स्वकर्मसूत्रेण ग्रथितः ?
13. भारतमाता कैः पूजिता ?
14. सर्वरोगक्षयः केन भवति ?
15. पाण्डवाः वनवासं कुत्र अनुभवन्ति स्म ?
16. 'ब्रह्मसूत्राणि' कस्य कृतिः ?

II. चतुर्थपदं लिखत – 4 × 1 = 4

17. उत्तानपादस्य ज्येष्ठा भार्या – सुरुचिः ; उत्तानपादस्य कनिष्ठा भार्या – ................।
18. श्रीपुष्ट्यारोग्यवर्धनम् – स्नानेन ; दीर्घमायुः – ........................... ।
19. भोजः – सिन्धुलस्य आत्मजः ; मुञ्जः – ........................... ।
20. चन्द्रस्य वृद्धिः – शुक्लपक्षे भवति ; चन्द्रस्य क्षयः – ........................... ।

III. लघूत्तराणि संस्कृतभाषया लिखत — 5 × 2 = 10

21. डा० सत्यव्रतशास्त्रिमहोदयः कदा कुत्र अजायत ? तस्य मातापितरौ कौ ?

22. अमात्यः बुद्धिसागरः मुञ्जं किम् आह ?

23. परशुरामः किमर्थं कर्णं शशाप ?

**अथवा**

अघोरसंज्ञः कः ? सः इन्दिरारमणं किम् आचचक्षे ?

24. युधिष्ठिरं प्रति भीष्मः दैवपुरुषकारयोः विषये किं वदति ?

25. आतोद्य कति विधम् ? तानि कानि ?

IV. श्लोकयोः तात्पर्यं कर्णाटकभाषया, आंग्लभाषया, संस्कृतभाषया वा लिखत — 3 × 2 = 6

26. यथा नद्यः स्यन्दमानाः समुद्रेऽस्तं गच्छन्ति नामरूपे विहाय ।
तथा विद्वान् नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यम् ।।

27. ततं तन्त्रीगतं ज्ञेयम् अवनद्धं तु पौष्करम् ।
घनस्तु तालो विज्ञेयः सुषिरो वंश एव च ।।

28. ऐरावतं ततो दृष्ट्वा महत्तदिदमित्यपि ।
फलं मत्वा हस्तिराजमभिदुद्राव मारुतिः ।।

**अथवा**

ततो गिरौ पपातैष इन्द्रवज्राभिताडितः ।
पतमानस्य चैतस्य वामो हनुरभज्यत ।।

V. कवयोः देश-काल-कृतीनां विषये लिखत — 2 × 3 = 6

29. नीलकण्ठदीक्षितः ।

30. डा० के०एस० नागराजन् ।

VI. यथानिर्देशम् उत्तरं लिखत — 3 × 3 = 9

31. शरणागतरक्षणं धर्मः इति अस्माकं श्रद्धा ।
कः पाठः ? कः अवदत् ? शरणागतः कः ?

32. किंस्वित् श्रेष्ठतरं भवेत् ?
कः पाठः ? कः अपृच्छत् ? कम् अपृच्छत् ?

33. याचको भूत्वा अत्र अहमागतः ।
कः पाठः ? कम् अवदत् ? याचकरूपेण कः आगतः ?

**अथवा**

सागरः इव तिष्ठतु ते यशः ।
कः पाठः ? कः अवदत् ? कस्य यशः ?

VII. दशवाक्यैः उत्तरं कर्णाटकभाषया, आङ्ग्लभाषया, संस्कृतभाषया वा लिखत – $4 \times 4 = 16$

34. हिमालयस्य अमरनाथगुहाविषये का पुराणकथा अस्ति ? लिखत ।

35. आञ्जनेयस्य बाल्यवृत्तान्तं पद्यानुगुणं सङ्गृह्य लिखत ।

36. वृक्षायुर्वेदग्रन्थे निरूपितानां चतुर्विधवृक्षाणां विषये लिखत ।

**अथवा**

शल्यं प्रति कर्णेनोक्तम् अस्त्रवृत्तान्तं विवृणुत ।

37. किमर्थं मुञ्जः भोजं मारयितुं प्रयतते ?

VIII. श्लोकौ पूरयत – $2 \times 4 = 8$

38. मनीषिणः ..........................................................................................

..........................................................................................।

..........................................................................................

.......................................................................... दुर्लभम् ॥

39. पिबन्ति ..........................................................................................

..........................................................................................।

..........................................................................................

.......................................................................... विभूतिः ॥

IX. अधोलिखितम् अनुच्छेदं पठित्वा अनुच्छेदाधारितान् प्रश्नान् उत्तरत – $4 \times 1 = 4$

40. बालगङ्गाधरतिलकः अप्रतिमः देशभक्तः आसीत् । सः लोकमान्यतिलकः इत्येव विश्रुतः । क्रि०श० 1856 तमे वर्षे महाराष्ट्रस्य रत्नगिरिमण्डले सः अजायत । तस्य पिता गङ्गाधरशास्त्रिमहोदयः संस्कृतज्ञः अवर्तत । माता पार्वतीदेवी । अध्ययनानन्तरं बालगङ्गाधरः भारतस्य स्वातन्त्र्यसङ्ग्रामे भागम् अवहत् । तेन सह बिपिनचन्द्रपालः लालालाजपतरायः च भागं गृहीतवन्तौ । तदानींतनकाले ते त्रयः 'लाल्-बाल्-पाल्' इत्येव विख्याताः । बालगङ्गाधरतिलकः "स्वराज्यं मम जन्मसिद्धः अधिकारः" इति उदघोषयत् । अनन्तरं पत्रिकायाः सम्पादकः भूत्वा 'मराठा' तथा 'केसरी' इति पत्रिकाद्वयं सम्पादयत् । जनेषु स्वातन्त्र्यविषये उत्साहम् अवर्धयत । एषः क्रि०श० 1920 तमे वर्षे स्वर्गस्थः अभवत् ।

i) बालगङ्गाधरः किमिति विश्रुतः ?

ii) बालगङ्गाधरः कुत्र अजायत ?

iii) 'लाल्-बाल्-पाल्' इति विख्याताः के ?

iv) बालगङ्गाधरतिलकस्य उद्घोषणं किम् ?

## भागः - B

### (व्याकरणविभागः)

### (30 अङ्काः)

X. निम्नलिखितेषु प्रश्नेषु अपूर्णविवरणेषु वा प्रत्येकाय चत्वारः विकल्पाः प्रदत्ताः तेषु एकमेव शुद्धं उपयुक्तं वा वर्तते । उपयुक्तं विकल्पं चित्वा प्रश्नस्य समक्षे निर्दिष्टस्थाने अक्षरसहितं अस्योत्तरं पूरयतु । $10 \times 1 = 10$

41. विलम्बः – अस्य विरुद्धार्थकपदम् इदं भवति –

(A) प्रविलम्बः (B) सविलम्बः

(C) अविलम्बः (D) सुविलम्बः ।

42. यथाबलम् – अत्र एषः समासः वर्तते –

(A) अव्ययीभावः (B) बहुव्रीहिः

(C) द्वन्द्वः (D) तत्पुरुषः ।

43. एषु शुद्धं वाक्यम् इदं भवति –

(A) नारी कुसुमात् स्पृह्यति (B) नारी कुसुमाय स्पृह्यति

(C) नारी कुसुमस्य स्पृह्यति (D) नारी कुसुमेन स्पृह्यति ।

44. 'वनम्' – अस्य समानार्थकपदम् इदं भवति –

(A) गमनम् (B) गणनम्

(C) गहनम् (D) गदनम् ।

45. धेनुर्धावति – अत्र एषः सन्धिः वर्तते –

(A) विसर्गसन्धिः (B) अनुनासिकसन्धिः

(C) जश्त्वसन्धिः (D) अनुस्वारसन्धिः ।

46. दृश्यते – अत्र एषः लकारः वर्तते –

(A) लिट् (B) लोट्

(C) लट् (D) लृट् ।

47. शिक्षकः – अस्य स्त्रीलिङ्गरूपम् इद भवति –

(A) शिक्षका (B) शिक्षिका

(C) शिक्षकी (D) शिक्षिकी ।

48. यद्यहम् – अत्र सन्धिविभजने शुद्धं रूपम् एवं भवति –

(A) यत् + अहम् (B) यदा + अहम्

(C) यद्य + अहम् (D) यदि + अहम् ।

49. सुखस्य – अत्र एषा विभक्तिः वर्तते –

(A) प्रथमा (B) पञ्चमी

(C) द्वितीया (D) षष्ठी ।

50. दत्त धनः – अस्य विग्रहवाक्यम् इदं भवति –

(A) दत्तं धनं यस्मात् सः (B) दत्तं धनं यस्मै सः

(C) दत्तं धनं येन सः (D) दत्तं धनं यस्मिन् सः ।

51. प्रयोगपरिवर्तनं कुरुत – $2 \times 1 = 2$

a) बालिका चित्रं पश्यति ।

b) त्वया जलं पीतम् ।

52. रेखाङ्कितपदम् अवलम्ब्य प्रश्ननिर्माणं कुरुत – $2 \times 1 = 2$

a) शास्त्रिमहोदयः महान् देशभक्तः आसीत् ।

b) 'बोधिसत्त्वचरितम्' शास्त्रिमहोदयस्य कृतिः ।

53. वाक्ये विद्यमानं कृदन्तपदं चित्वा प्रत्ययस्य नाम लिखत – $2 \times 1 = 2$

a) कम्पमानात् वृक्षात् फलं पतति ।

b) छात्रः शालां गत्वा पाठं पठति ।

54. लकारपुरुषवचनानि लिखत – $2 \times 1 = 2$

a) धावति

b) अलभन्त ।

55. लिङ्गविभक्तिवचनानि लिखत – $2 \times 1 = 2$

a) मम

b) सेवा ।

56. सन्धिं विभज्य नाम लिखत – $2 \times 1 = 2$

a) तवायम्

b) मुनिरवदत् ।

57. विग्रहवाक्यं विलिख्य समासनाम लिखत – $2 \times 1 = 2$

a) निर्धनः

b) प्रजाहितम् ।

XI. वाक्ये विद्यमानं अलङ्कारं सलक्षणं विवृणुत – 3

58. श्रीरामः समुद्रः इव गम्भीरः ।

XII. प्रस्तारं विलिख्य गणविभागं कृत्वा छन्दोनाम लिखत – 3

59. देयं तथापि कवचं सह कुण्डलाभ्याम् ।

# भागः - C

## (रचनविभागः)

## (16 अङ्काः)

XIII. संस्कृतभाषया अनुवादं कुरुत – 3

60. ಭಾರತ ದೇಶದಲ್ಲಿ ಅನೇಕ ನದಿಗಳು ಹರಿಯುತ್ತದೆ. ದಕ್ಷಿಣ ಭಾರತದ ನದಿಗಳಲ್ಲಿ ಕಾವೇರಿ ನದಿಯೂ ಒಂದು. ಇದು ಕರ್ನಾಟಕದ ಜೀವನದಿಯಾಗಿದೆ.

    Many rivers flow in India. River Kaveri is one among the rivers of South India. It is the lifeline of Karnataka.

XIV. कर्णाटकभाषया, आङ्ग्लभाषया वा अनुवादं कुरुत – 3

61. मानवः अनुकरणशीलः । सः अनुकरणेन एव अनेकान् विषयान् अधिगच्छति । ज्येष्ठाः समाज यथा आचरन्ति तथा कनिष्ठाः अपि आचरन्ति ।

XV. पत्रं लिखत – 5

62. धारवाडनगरस्य वाणी विद्यालयस्य विद्या / विवेकः इति मत्वा ग्रामोत्सवे भागं गृहीतं दिनद्वयं विरामं प्रार्थ्य वर्गोपाध्यायं प्रति विरामपत्रं लिखत ।

**अथवा**

शालाप्रवाससमये युष्माभिः अवलोकितस्य क्षेत्रस्य वर्णनं कृत्वा मित्रं प्रति पत्रं लिखत ।

XVI. 63. एकं विषयम् अधिकृत्य प्रबन्धम् लिखत – 5

i) वार्तापत्रिकाः

ii) स्वातन्त्र्योत्सवः

iii) सङ्गणकयन्त्रम् ।